श्रीः

श्रीमते रामानुजाय नमः

# श्रीभाष्यकारमङ्गलम्

श्रीपरांकुशपादाब्जसुरभीकृतमौलये । श्रीवत्सचिह्ननाथाय भाष्यकाराय मङ्गलम् ।।१।।

नाथपद्माक्षरामार्यपादपंकज सेविने । सेव्याय सर्वयमिनां यतिराजाय मङ्गलम् ।।२।।

पूर्णार्यपूर्णकरुणापात्रायामिततेजसे । मालाधरप्रियायास्तु यतिराजाय मङ्गलम् ।।३।।

संसेव्य यामुनाचार्यं एकलव्योस्म्यहं गुरोः । इत्येवं वदते नित्यं यतिराजाय मङ्गलम् ।।४।।

श्रीकाञ्चीपूर्णमिश्रोक्त रहस्यार्थविदे सदा । देवराजप्रियायास्तु यतिराजाय मङ्गलम् ।।५।।

श्रीमद् गोष्ठीपुरीपूर्णदिव्याज्ञां कुर्वते मुदा । श्लोकार्थं गृह्णते तस्मात् यतिराजाय मङ्गलम् ।।६।।

कूरेशकुरुकानाथदाशरथ्यादिदेशिकाः । यच्छिष्या भान्ति ते तस्मै यतिराजाय मङ्गलम् ।।७।।

चरमश्लोकतत्त्वार्थं ज्ञात्वार्याज्ञां विलंघ्य च । दिशते तं स्वकीयेभ्यः यतिराजाय मङ्गलम् ।।८।।

श्रीशैलपूर्णकृपया श्रीरामायणमर्थतः । भक्त्या येन श्रुतं तस्मै यतिराजाय मङ्गलम् ।।९।।

शंकरादिकुदृष्टीनां बाह्यानां निधनाय च । श्रीभाष्यं कुर्वते तस्मै यतिराजाय मङ्गलम् ।।१०।।

कुर्वन्नुपनिषद्भाष्यं जगद्रक्षां करोति यः । दयायाः परतन्त्राय भाष्यकाराय मङ्गलम् ।।११।।

द्रमिडोपनिषद्व्याख्यां कालयेति कृपाबलात् । शासते कुरुकेशं तं भाष्यकाराय मङ्गलम् ।।१२।।

गत्वा तु शारदापीठं वृत्तिं बोधायनस्य च । अवलोक्यागतायास्तु भाष्यकाराय मङ्गलम् ।।१३।।

परमाणुमृषावादिवादिसंहारकारिणे । तस्मै भगवते श्रीमद्भाष्यकाराय मङ्गलम् ।।१४।।

श्रीमत्कुरङ्गपूर्णाय श्रीभाष्यं वदते स्वयम् । पित्रे सम्पत्सुतस्यापि भाष्यकाराय मङ्गलम् ।।१५।।

दत्वा वृषगिरीशस्य शंखचक्रे रमापतेः । परमप्रीतियुक्ताय भाष्यकाराय मङ्गलम् ।।१६।।

सन्यासं कुर्वते काञ्च्यां अनन्तसरसीतटे । वरदे न्यस्तभाराय भाष्यकाराय मङ्गलम् ।।१७।।

श्रीमन्महाभूतपुरे श्रीमत्केशवयज्वनः । कान्तिमत्यां प्रसूताय यतिराजाय मङ्गलम् ।।१८।।

शेषो वा सैन्यनाथो वा श्रीपतिर्वेति सात्विकैः । वितर्क्याय महाप्राज्ञैः यतिराजाय मङ्गलम् ।।१९।।

प्रकृष्टगुणपूर्णाय प्राप्याय स्वाङ्घ्रिसेविनाम् । प्रपन्नसार्थवाहाय यतिराजाय मङ्गलम् ।।२०।।

वेदात्मकप्रमाणेन सात्विकैश्च प्रमातृभिः। प्रमेयेण सह श्रीमान् वर्धतां यतिशेखरः ।।२१।।

इति श्रीभाष्यकारमङ्गलं सम्पूर्णम्